जीयमानः, जाप्यमानः, जिगीष्यमाणः, जेजीय्यमानः ;
[1]जयः, जापः, जिगीषः, जेजीयः ;
जेतुम्, जापयितुम्, जिगीषितुम्, जेजीयितुम् ;
जितिः, जापना, विजिगीषा, जेजीया ;
जयनम्, [2]उज्जयिनी, जायनम्, जिगीषणम्, जेजीयनम् ;
जित्वा, जापयित्वा, जिगीषित्वा, जेजीयित्वा ;
[3]विजित्य, विजाप्य, विजिगीष्य, विजेजीय्य ;
जायम् २, जित्वा २, } जापम् २, जापयित्वा २, } जिगीषम् २, जिगीषित्वा २, } जेजीयम् २ ; जेजीयित्वा २ ; }
[4]जैत्रम्, [5]जायुः.

(600) "जि अभिभवे" (I-भ्वादिः-946. सक. अक. अनि. पर.)

अभिभवो न्यूनीकरणं न्यूनीभवनं च ।

आद्ये सकर्मकः । शत्रून् जयति । द्वितीये त्वकर्मकः । अध्ययनात् पराजयते । अध्येतुं ग्लायतीत्यर्थः । इति सिद्धान्तकौमुदी । शत्रून् जयन्-जेता वा । अध्ययनात् पराजेता । ग्लायन् इत्यर्थः ।

'[जयिः] जयेज्जयाभिभवयोराद्योऽर्थेऽसावकर्मकः ॥'
उत्कर्षप्राप्तिराद्योऽर्थो द्वितीयेऽर्थे सकर्मकः ।'(श्लो.13-14) इति देवः ।
एकस्मिन्नेव गणेऽर्थभेदात् पुनः पाठ इति बोध्यम् ।

---

1. 'एरच्' (3-3-56) इति भावादौ अप् । घञपवादः ।
2. उज्जयन्ति अस्यां वसन्तः इति उज्जयिनी । 'करणाधिकरणयोश्च' (3-3-117) इति ल्युट् । स्त्रियां टित्वान्ङीपि उज्जयिनी इति भवति । उज्जयिनी—नगरविशेषः ।
3. ल्यपि 'ह्रस्वस्य—' (6-1-71) इति तुक् ।
4. 'उणादयो बहुलम्' (3-3-1) इति त्रण्प्रत्ययः । 'अचो ञ्णिति' (7-2-115) इति वृद्धिः ।
5. 'कृवापाजिमि—' [द. उ. 1-86] इति उण्प्रत्यये वृद्धौ, आयादेशे जायुः । जयति अनेन रोगानिति जायुः=औषधम् ।